दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-171 | 1 | अप्रैल 12, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णैकादशी
चैत्र 30 प्रविष्ठांशः मङ्गलमयः भवेत्

2 महिला-आरक्षण-विधेयकस्य कार्यान्वयनार्थं प्रधानमन्त्रिणः आह्वानम्; षोडशाधिक-अष्टशतं भविष्यति लोकसभा-आसनानां संख्या

3 पञ्चायतनिर्वाचनेभ्यः पूर्वमेव जनविरोधी-काङ्ग्रेस-सर्वकारस्य पतनं निश्चितम्, सराज-क्षेत्रे जयराम-ठाकुरस्य गर्जनम्

4 परम्परा-संस्कारयोः संगमः विद्याधर-गुरुकुले नूतनप्रवेशोत्सवः

## जुलाई-मासस्य तृतीयदिनाङ्कात् आरप्स्यते अमरनाथ-यात्रा; एप्रिल-मासस्य पञ्चदश-दिनाङ्कतः पञ्जीकरणं भविष्यति



ऐषमे वर्षे वार्षिक-अमरनाथ-यात्रा जुलाई-मासस्य तृतीय-दिनाङ्कात् आरभ्य अष्टाविंशति-दिनाङ्के यावत् रक्षाबन्धनावसरे समाप्तिमेष्यति। जम्मू-कश्मीरस्य उप-राज्यपालः मनोज सिन्हा अद्य उद्घोषितवान् यत् इयं यात्रा तावत् सप्तपञ्चाशत् दिनानि यावत् प्रचलिष्यति। उप-राज्यपालेन सामाजिक सञ्जालीय-माध्यमे संसूचितं यत् भगवतः शिवस्य आशीर्प्राप्तये प्रथमं पूजनं ज्येष्ठ-पूर्णिमायां इत्युक्ते जून-मासस्य एकोनत्रिंशद्दिनाङ्के समायोजयिष्यते। सः अवदत् यत् तीर्थयात्रायै पूर्व-पञ्जीकरणं एप्रिल-मासस्य पञ्चदश-दिनाङ्कतः अन्तर्जालीय-माध्यमेन सहैव प्रत्यक्ष-रूपेण चारभ्यते। देशव्यापी-स्तरे जम्मू-कश्मीर-बैङ्क, पञ्जाब नेशनल बैङ्क, भारतीय-स्टेट-बैङ्क एवमेव यस बैङ्क इत्यादीनां चतुष्पञ्चाशदधिक-पञ्चशतशाखासु पञ्जीकरणस्य व्यवस्था भविष्यति।

## विदेशमन्त्री एस. जयशंकरः यूएई-यात्रायाम्; भारतीय-समुदायस्य सुरक्षाविषये क्षेत्रीयस्थितौ च कृतवान् चर्चा

विदेशमन्त्री एस. जयशंकरः यूएई देशस्य द्विदिवसीयायां यात्रायाम् अस्ति। डॉ. जयशंकरः पश्चिम एशियादेशे वर्तमानसमये भारतीयनागरिकाणां कल्याणमालक्ष्य अबूधाबी-नगरे उच्चस्तरीयवार्ता कृतवान्। सः ह्यः यूएई-देशस्य उपप्रधानमन्त्रिणा विदेशमन्त्रिणा च शेख अब्दुल्ला बिन जायद अल नाहयानेन सह मिलितवान्। अस्मिन् अवसरे चर्चायाः मुख्यविषयः क्षेत्रीयस्थितौ जायमानानि परिवर्तनानि तस्य प्रभावाश्च आसन्। डॉ. जयशंकरः भारतीय-समुदायस्य सुरक्षा-कल्याणयोः सुनिश्चयार्थं यूएई-प्रशासनस्य सहयोगाय कृतज्ञतां प्रकटितवान्। सममेव उभयोः देशयोः मध्ये व्यापक रणनीतिक सम्बन्धान् सुदृढीकर्तुं उपायान् अपि प्रकल्पितवान्।

## पश्चिमबङ्गाले निर्वाचनप्रचारः तीव्रः- सिलिगुडी-नगरे प्रधानमन्त्रिणा कृतं तृणमूल-कांग्रेस-दलस्य तीक्ष्णम् आलोचनम्



पश्चिमबङ्गाल तमिलनाडुराज्ययोः निर्वाचनप्रचारः तीव्रतया प्रवर्तते, यतः अस्य मासस्य त्रयोविंशति-दिनाङ्के भविष्यति मतदानम्, यस्य कृते केवलं एकादश-दिनानि अवशिष्टानि सन्ति। पश्चिमबङ्गाले सर्वाणि प्रमुखानि राजनैतिकदलानि स्वस्य शीर्षनेतृभिस्सह सर्वेषु जनपदेषु जनसभां सम्बोधयन्ति। भारतीयजनतादलस्य वरिष्ठनेता तथा प्रधानमन्त्री नरेन्द्रमोदी सिलिगुडी-नगरस्य कावाखाली-स्थाने एकां जनसभां सम्बोधितवान्। प्रधानमन्त्रिणा उक्तं यत् पश्चिमबङ्गालस्य जनानां मध्ये उत्साहः अस्य संकेतः अस्ति यत् आगामिषु निर्वाचनेषु सत्तारूढं तृणमूल-काङ्ग्रेस्-दलं पराजयं प्राप्स्यति। प्रधानमन्त्री नरेन्द्रमोदी आरोपितवान् यत् तृणमूल कांग्रेस-प्रशासनेन स्वकार्यकाले राज्यस्य विकासं अत्यन्तं प्रभावितम्। श्रीमोदी इदमपि अवदत् यत् निधिविनियोगे असन्तुलनम् आसीत्। तेन उक्तं यत् मदरसा इत्यस्य कृते पर्याप्तसंसाधनानि प्रदत्तानि, परञ्च उत्तरबङ्गप्रदेशस्य विकासावश्यकताः सम्यक् न पूरिताः। प्रधानमन्त्री अग्रे आरोपितवान् यत् राज्यप्रशासनम् महिलानां पर्याप्तसुरक्षां सुनिश्चेतुं असमर्थम् आसीत्। तेन जनसामान्याय आह्वानं कृतं यत् राज्ये विकासाय उत्तमशासनाय च भारतीय जनता पार्टीति दलस्य समर्थनं कुर्वन्तु। उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः बांकुरा जनपदस्य सोनमुखी-क्षेत्रे तथा च पूर्वमेदिनीपुर-जनपदस्य नन्दकुमार-कांथीदक्षिणक्षेत्रयोः सभां संबोधयितुं गमिष्यति। अस्मिन्नेव क्रमे तृणमूल कांग्रेस दलस्य नेतृ ममता बनर्जी पूर्ववर्धमान-जनपदस्य खण्डघोष-क्षेत्रे आयोजितायां निर्वाचनसभायां संबोधितवती तथा भारतीय जनता पार्टीति दलस्य आलोचनां कृतवती। सा उक्तवती यत् तस्याः दलं स्ववचनानि पूरयति, किन्तु भाजपानेतारः केवलं वचनानि प्रयच्छन्ति, तानि नैव पूरयन्ति।

## प्रख्याता गायिका आशा-भोसले मुंबईय्यां द्विनवतितमे वयसि दिवङ्गता



प्रख्यात गायिका, पद्मविभूषण पुरस्कारेण च सम्मानिता आशा भोसले इत्येषा अद्य मुम्बई-नगरे द्विनवतितमे वयसि दिवङ्गता। महाराष्ट्रस्य संस्कृति-मन्त्री आशीष शेलारः चिकित्सालयस्य बहिः वार्ताहरैस्सह सह वार्ता कुर्वन् एतत् विज्ञापितवान्। गतसायं तस्याः हृदि वेदनायां सत्यां सा चिकित्सायै नीता। श्वः सायङ्काले चतुर्वादने मुम्बई-नगरस्य शिवाजी पार्क इत्याख्ये स्थले तस्याः अन्त्येष्टिः भविष्यति।

प्रधानमन्त्री नरेन्द्रमोदी प्रख्यात गायिकायाः आशाभोसले इत्यस्याः निधने गभीरं दुःखं प्रकटितवान्। सामाजिक-सञ्जालीय-माध्यमे स्वसन्देशे श्रीमोदी अवदत् यत् आशा भोसले भारतस्य सुप्रसिद्धासु बहुमुखी प्रतिभा-युक्तासु वाणीषु अन्यतमा आसीत्। राष्ट्रपतिपदासीना द्रौपदी मुर्मूः अवसरेऽस्मिन् शोकं प्रकटितवती। राष्ट्रपतिना प्रोक्तं यत् तस्याः निधनेन सङ्गीतजगति अपूरणीया क्षतिः समभवत्।

## सुभाषितम्

**अधीत्य चतुरो वेदान्,**
**सर्वशास्त्राण्यनेकशः।**
**ब्रह्मत्वं न जानाति,**
**दर्वी पाकरसं यथा।।**

भावार्थः- चारों वेदों एवं अनेक शास्त्रों को पढ लेने के बाद भी यदि ब्रह्मज्ञान नहीं हुआ तो वह वैसा ही है जैसे कलछुली (कड़छी) अनेक व्यञ्जनों में घूमते हुए भी उनके स्वाद से अनभिज्ञ रह जाती है।







## अमेरिका-ईरानदेशयोः शान्तिवार्ता विफला, आण्विक-विषये मतभेदकारणतः

### इस्लामाबाद-नगरात् उभयपक्षीय-प्रतिनिधिमण्डलानां प्रस्थानम्अ



अमेरिकायाः उपराष्ट्रपतेः जे.डी. वैन्स इत्यस्य नेतृत्वयुतं प्रतिनिधिमण्डलं तथा च ईरान-देशस्य प्रतिनिधिमण्डलम् इस्लामाबाद-नगरतः प्रस्थितवन्तौ। उभयोः पक्षयोः मध्ये कस्मिन्नपि सन्धौ सहमतिः न सञ्जाता। अमेरिकायाः उप-राष्ट्रपतिना शान्ति-वार्तायाः विफलतायाः कारणत्वेन ईरान देशस्य नकारात्मक दृष्टिकोणः प्रतिपादितः। तेन प्रतिपादितं यत् ईरान-देशः आण्विक-शस्त्राणां निर्माण-सम्बद्धान् प्रस्तावान् निराकृतवान्। अपरतः, ईरान-देशस्य सर्वकारीय-प्रसारमाध्यमैः अपि वार्तायाः वैफल्यं स्पष्टीकृतम्। ईरान-देशस्य विदेश-मन्त्रालयेन प्रोक्तं यत् मुख्येषु द्वि-त्रि-विषयेषु मतभेदकारणात् इयं स्थितिः समुत्पन्ना। अवधेयास्पदमिदं यत् ईरान-देशस्य अयं सङ्घर्षः फरवरी-मासस्य अन्ते प्रारब्धः आसीत्। उभयोः पक्षयोः मध्ये एकविंशति-होरां यावत् सुदीर्घा चर्चा समजायत।

# हिमाचल-पर्यटनम्: २४ इको- टूरिज्म- अध्यायानां स्वीकृतिः, पर्यटनस्य वृद्ध्या सह युवानः रोजगारं प्राप्स्यन्ति



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य वनविभागेन पारिस्थितिक- पर्यटन- स्थलानां (Eco-Tourism Sites) आबंटनाय सज्जीकृतेभ्यः २४ इको- टूरिज्म- अध्यायेभ्यः केन्द्रसर्वकारस्य पर्यावरण- वन- जलवायुपरिवर्तन- मन्त्रालयेन अनुमतिः प्रदत्ता। एतेषाम् अध्यायानाम् अन्तर्गतं निर्मिताः योजनाः आगामि २० वर्षाणि यावत् प्रचालयिष्यन्ते, येन पर्यटनं नूतनम् आकर्षणं प्राप्स्यति तथा च युवभ्यः रोजगारस्य अवसराः सुलभाः भविष्यन्ति।अस्मिन् वारे विभिन्नस्थलानां 'वर्किंग प्लान' (कार्ययोजना) मध्ये इको-टूरिज्म इति एकस्य नूतनस्य अध्यायस्य रूपेण सम्मिलितं कृतम् अस्ति। अस्य अन्तर्गतं चितेषु स्थलेषु विकासकार्यैः सह पर्यटनगतिविधिभ्यः प्रोत्साहनं दीयते। एतेषु शिबिरस्थापनं, साहसिकक्रीडाः, खाद्यविपण्याः, खाद्यवाहनानि, मोटर-साइकिल- भ्रमणम् इत्यादयः गतिविधयः सम्मिलिताः सन्ति, येन पर्यटकाः आकर्षिताः भवेयुः। अस्याः पहलस्य मुख्योद्देश्यं पर्यटकान् तादृशानां स्थलानां प्रति नयनम् अस्ति, यत्र ते प्रकृतेः वन्यजीवस्य च हानिं विना आनन्दं प्राप्तुं शक्नुवन्ति। एतत् पारम्परिकपर्यटनात् भिन्नम् अस्ति। एतत् 'हरित-यात्रा' तथा च संसाधनानां संरक्षणे बलं ददाति। अस्य अध्यायस्य स्वीकृतौ सत्यां पर्यटनं तु वर्धिष्यते एव, परं युवभ्यः आजीविकायाः मार्गाः अपि मोक्षिताः भविष्यन्ति। एतेषां स्थलानां व्यापकरूपेण विज्ञापनं कृत्वा प्रचारः करणीयः अस्ति। एतानि स्थलानि न केवलं नैसर्गिक- सौन्दर्येण परिपूर्णानि सन्ति, अपितु एतेषां यात्रा पर्यावरणं प्रति उत्तरदायित्वस्य पालनेन सह सम्बद्धा अस्ति।

**एतेषां मण्डलानां पर्यटन-अध्यायाः स्वीकृताः-**

स्वीकृतेषु मण्डलेषु प्रदेशस्य कुल्लू, पार्वती, सराज, पालमपुर, धर्मशाला, ठियोग, शिमला- ग्रामीणं, रोहड़ू, रामपुरं, कोटगढ़म्, आनी, हमीरपुरम्, ऊना, कुटलैहड़, बिलासपुरम्, कुनिहारः, मण्डी, नाचन, करसोग, डलहौजी, राजगढ़, पवांटा, सोलन, नूरपुरम् इति क्षेत्राणि सम्मिलिताः सन्ति। एतेषां विकासेन पर्यटनं रोजगारः च प्रवर्धिष्यते।

**इको-टूरिज्म-अध्याये एवं भविष्यति कार्यम्-**

इको-टूरिज्म-अध्यायेषु कोमलविवरणं दीयते यत् काः गतिविधयः भविष्यन्ति। एतानि स्थलानि 'सार्वजनिक- निजी-सहभागिता' (PPP Mode) आधारेण प्रचालयिष्यन्ते। अस्य कार्ययोजना मण्ड्यां स्थिताय नोडल- अधिकारिणे (अतिरिक्त- प्रधान- मुख्य- वनसंरक्षकः) प्रेष्यते। तदनन्तरं एषः पर्यावरण- वन-जलवायुपरिवर्तन-मन्त्रालयाय प्रेष्यते। मन्त्रालयात् अनुमतिं लब्ध्वा एव गतिविधयः आरभ्यन्ते।

# महिला-आरक्षण-विधेयकस्य कार्यान्वयनार्थं प्रधानमन्त्रिणः आह्वानम्; षोडशाधिक-अष्टशतं भविष्यति लोकसभा-आसनानां संख्या



प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् इदानीं महिला-आरक्षण-विधेयकस्य वास्तविक रूपेण कार्यान्वयन-समयः आगतो विद्यते। सः आशां प्रकटितवान् यत् एकोनत्रिंशदधिक-द्विसहस्रतमवर्षस्य लोकसभा-निर्वाचनं राज्य विधानसभा निर्वाचनानि च महिलाभ्यः निर्धारितारक्षणं समेत्य भविष्यन्ति। संसद् भवनस्य त्रिदिवसीय विशेषाधिवेशनात् प्राक् लोकसभायाः राज्यसभायाः च सदन नेतृभ्यः प्रेषिते पत्रे श्रीमोदी सर्वान् सदस्यान् एकस्वरेण अस्य विधेयकस्य संशोधनानि पारयितुं साहाय्यं याचितवान्। अस्य अधिनियमस्य प्रवर्तनेन लोकसभासनानां संख्या षोडशाधिक-अष्टशतं भविष्यति, यत्र त्रिसप्तत्यधिक-द्विशतं आसनानि महिलाभ्यः आरक्षितानि भविष्यन्ति। अनेनैव सह भारतीय जनता पार्टीति दलेन स्व-सांसदेभ्यः व्हिप इति आधिकारिक आदेशः निस्सारितः, येन आगामि-षोडश-दिनाङ्कतः अष्टादश-दिनाङ्क यावत् सर्वेषां उपस्थितिः अनिवार्या भविष्यति। अस्मिन् अवसरे कस्यापि सदस्यस्य कृते अवकाशः न प्रदास्यते। संसद् भवनस्य एतत् विशेषाधिवेशनं गुरुवासरात् प्रारभ्यते, यस्य मुख्य केन्द्र महिला आरक्षण-संशोधन-विधेयकं वर्तते।

# जलाशयेभ्यः प्राप्तानां मत्स्यानां कृते न्यूनतम- समर्थन- मूल्यस्य घोषणा,




## स्वामित्त्वशुल्कं १ प्रतिशतं यावत् न्यूनीकृतम्- मुख्यमंत्री सुक्खुः

हिमसंस्कृतवार्ताः- शिमला।

हिमाचलप्रदेशसर्वकारेण मत्स्यक्षेत्रं सुदृढं कर्तुं तथा धीवराणाम् आजीविकां सुनिश्चितं कर्तुं महत्त्वपूर्णा दूरदर्शिनी च वार्ता कृता। मुख्यमन्त्रिणः सुखविन्दरसिंह सुक्खुमहोदयस्य २०२६-२७ वर्षस्य आयव्ययकस्य (बजट) घोषणानाम् अनुगुणं, मत्स्यविभागः एतां वार्तां भूमितले कार्यान्वितुं सज्जः अस्ति। आपणस्य (बाजार) आरोहावरोहणात् जलाशय- धीवराणां सुरक्षा, तेषाम् उत्पादस्य कृते उचितमूल्यं सुनिश्चितं करणं तथा च तेषाम् आयवर्धनं इत्येतानि उद्देश्यानि मनसि निधाय एतानि पदानि उत्तानि सन्ति। एषः प्रयासः धीवराणां कल्याणे तथा मत्स्यक्षेत्रस्य शाश्वतविकासे सर्वकारस्य प्रतिबद्धतां दर्शयति।

**धीवराणां कृते ऐतिहासिकं निर्णयम्**

मुख्यमन्त्रिणा हिमाचलप्रदेशस्य इतिहासे प्रथमान्तं जलाशयेभ्यः प्राप्तानां मत्स्यानां कृते न्यूनतम- समर्थन- मूल्यस्य (MSP) घोषणा कृता अस्ति। अस्य पदस्य उद्देश्यं धीवरान् मूल्येषु अनिश्चिततायाः रक्षितुं, तेभ्यः निश्चितम् आयं प्रदातुम् अस्ति। जलाशय-मत्स्यानां कृते न्यूनतम- समर्थन- मूल्यं १०० रूप्यकाणि प्रति किलोग्राम इति निश्चितं कृतम् अस्ति। अपि च, यदि निविदामूल्यं १०० रूप्यकाणि प्रति किलोग्रामतः न्यूनं भवति, तर्हि राज्यसर्वकारः 'प्रत्यक्ष- लाभ- हस्तान्तरण' (DBT) माध्यमेन प्रति किलोग्रामं अधिकतमं २० रूप्यकाणि यावत् आर्थिकसहायतां (सब्सिडी) प्रदास्यति। अनेन पारदर्शिता निश्चिता भविष्यति। आर्थिकसहायता साक्षात् पात्राणां धीवराणां वित्तकोष-संख्यासु निक्षिप्तं भविष्यति। मुख्यमन्त्रिणा धीवरेभ्यः महदाश्रयं प्रदातुं, जलाशयेभ्यः प्राप्तेषु मत्स्येषु स्वामित्त्व-शुल्क-दरे उल्लेखनीया न्यूनता घोषिता। प्रदेशसर्वकारः पूर्वमेव स्वामित्त्वशुल्कं १५ प्रतिशततः ७.५ प्रतिशतं यावत् न्यूनीकृतवान् आसीत्, अधुना च अस्मिन् वर्तमान- वित्तवर्षे तत् न्यूनीकृत्य केवलं १ प्रतिशतं कृतम् अस्ति। अनेन निर्णयेन ६,००० तः अधिकाः जलाशय-धीवराः साक्षात् लाभं प्राप्स्यन्ति तथा च तेषाम् आर्थिकभारः न्यूनः भविष्यति।

**प्रमुखजलाशयाः मत्स्योत्पादनं च**

हिमाचलप्रदेशे पञ्च प्रमुखाः जलाशयाः सन्ति- गोविन्दसागरः (बिलासपुरं ऊना च), पौंगबाँधः (काङ्गड़ा), रणजीतसागरः चमेरा च (चम्बा), कोलबाँधः च (बिलासपुरम्)। गोविन्दसागर- कोलबाँध- रणजीतसागर- चमेराजलाशयेषु 'सिल्वर कार्प' प्रमुखा प्रजातिः अस्ति, यदा तु पौंगबाँधे 'सिन्धारा' प्रमुखा अस्ति। अन्यासु महत्त्वपूर्णप्रजातिषु रोहू, कतला, मृगल, कॉमन कार्प तथा ग्रास कार्प इत्येताः सम्मिलिताः सन्ति। उन्नत- फिंगरलिंग्स (७०-१०० मिमी) इत्येतेषां वार्षिकसंग्रहण (stocking) इव लक्ष्यितप्रयासानां कारणात् जलाशय- मत्स्योत्पादने उल्लेखनीया वृद्धिः अभवत्। जलाशयेभ्यः २०२२-२३ वर्षस्य उत्पादनं ५४९.३५ मीट्रिक टनतः वर्धित्वा २०२५- २६ वर्षे ८१८.०२ मीट्रिक टनं अभवत्, यत् अस्मिन् क्षेत्रे सुदृढां प्रगतिं दर्शयति।

एतैः प्रगतिशील-नीतिगत-उपायैः जलाशय- मत्स्य- अर्थव्यवस्था सुदृढा भविष्यति, शाश्वत- मत्स्य- ग्रहण- पद्धतीनां प्रोत्साहनं मिलिष्यति तथा च धीवरसमुदायस्य सहभागिता वर्धिष्यति। सर्वकारः मत्स्य- अवसंरचनायाः विस्ताराय, विपणन- व्यवस्थायां परिष्काराय तथा च धीवराणां मत्स्यपालकानां च कृते उन्नत- आजीविका- अवसराणां सृजनाय निरन्तरं यतते। प्रदेशसर्वकारस्य प्रयासानां फलस्वरूपं राज्ये आहत्य मत्स्योत्पादने अपि उल्लेखनीया वृद्धिः अङ्किता अस्ति। मत्स्योत्पादनं २०२४-२५ वर्षस्य १९,०१९ मीट्रिक टनतः वर्धित्वा २०२५-२६ वर्षे २०,००५ मीट्रिक टनम् अभवत्। एषा वृद्धिः मत्स्यक्षेत्रे प्रचलितानां विकासात्मक-पदानां सकारात्मकं प्रभावं दर्शयति तथा च ग्रामीण- रोजगारे राज्यस्य अर्थव्यवस्थायां च अस्याः वर्धमानां भूमिकाम् अधोरेखितां करोति।

# पञ्चायतनिर्वाचनेभ्यः पूर्वमेव जनविरोधी-काङ्ग्रेस-सर्वकारस्य पतनं निश्चितम्, सराज-क्षेत्रे जयराम-ठाकुरस्य गर्जनम्



**हिमसंस्कृतवार्ताः - मण्डी।** हिमाचलप्रदेशस्य पूर्वमुख्यमन्त्री तथा वर्तमान-विपक्षनेता जयरामठाकुरः स्वकीय-गृहविधानसभाक्षेत्रस्य दुर्गमक्षेत्राणां बागी, बांदल, खुनाची, डगैल, पलेउनी धार, थरापड़ च इति ग्रामाणां प्रवासं कृत्वा तत्रत्यैः निवासिभिः सह अमिलत्। सः जनानां समस्याः श्रुत्वा तासां समाधानाय सर्वसंभवसहायतायाः आश्वासनं दत्तवान्। पञ्चायतनिर्वाचनानां विषये कार्यकर्तॄन् संबोधयन् सः अवदत् यत् ते आपसीतालमेल-विकासयोः कार्यसूच्या (एजेण्डा) सह निर्वाचनप्राङ्गणे अवतरन्तु।

जयरामठाकुरेण विश्वासः कृतः यत् पञ्चायतनिर्वाचने तु सर्वकाराय आघातः भविष्यत्येव, आगामि-विधानसभा-निर्वाचनेष्वपि भारतीयजनतापार्टी प्रचण्डबहुमतेन सह सत्तायां प्रत्यागमिष्यति। सः प्रदेशं काङ्ग्रेसस्य जनविरोधीनीतिभ्यः मुक्तिं प्रदाय विकासस्य एकां नवीनां गाथां लेखिष्यति। सः अवदत् यत् काङ्ग्रेसपार्टी मिथ्याप्रत्याभूतीः (गारण्टी) दत्त्वा सत्तायां आगता अस्ति। आगमनानन्तरमेव एतैः युष्माकं क्षेत्रे युष्माकं अभ्यर्थिताः संस्थाः पिहिताः। एतैः युष्माकं दश कार्याणि स्थगितानि, अधुना यूयमपि एकं कार्यं कुरुत यत् काङ्ग्रेस-दलाय मतदानं स्थगयतु, येन भविष्ये युष्माभिः सह एतादृशं न भवेत्।

### केन्द्रसर्वकारस्य योगदानेन दुर्गमक्षेत्राणां विकासः

सः अवदत् यत् अद्य हिमालचस्य सर्वाधिकदुर्गमक्षेत्रेषु यत् मार्गाणां जालं दृश्यते, तत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे केन्द्रसर्वकारस्य सौजन्येन एव संभवम् अभवत्।

सः अवदत् यत् अद्य येन मार्गेण अहं अत्र प्राप्तवान्, तस्य निर्माणमपि केन्द्रात् प्राप्तेन १४ कोटिपरमितेन धनेन अभवत्। यूयं सर्वे जानन्तः यत् अस्य निर्माणं कदा आरब्धम् आसीत्, अद्य च तस्य निर्माणं पूर्णम् अभवत्।सराजविधानसभाक्षेत्रस्य पटकरी-भड़हा-सिल्ह-कशीम्बलीधार इत्यस्य १८ किमी दीर्घेण मार्गेण सह सम्बद्धानां बागी, खुनाची, डगैल, पालेऊणीधार, थरापड़, रूभड़ी, शिल्ह, भड़हा च इति पञ्चायतानां जनैः सह मिलित्वा सः अवदत् यत् एषः मार्गः 'विधायकप्राथमिकता' इत्यनेन निर्मितः अस्ति। नाबार्ड (NABARD) द्वारा १४ कोटिः तथा राज्यसर्वकारेण २ कोटिः इति प्रावधानं पूर्वतन-भाजपासर्वकारस्य काले २०१८ वर्षे कृतम् आसीत्। सर्वाः प्रक्रियाः पूर्णं कृत्वा २०२१ वर्षे कार्यम् आरब्धम्, २०२५ वर्षे च निर्मितं अभवत्।

### ग्रामीणक्षेत्राणां जीवनस्तरे उन्नयनम्

सः अवदत् यत् प्रधानमन्त्रीग्रामसड़कयोजना नाबार्ड च इत्यनयोः माध्यमेन निरन्तरं प्राप्तवता आयव्ययकेन (बजट) ग्रामीणक्षेत्राणां जनानां 'पृष्ठस्य भारं' उतारयितुं कार्यं कृतम्, येन तेषां जीवनस्तरे व्यापकः परिष्कारः आगतः। विरोधकैः तस्य क्षेत्रे मार्गाणां निर्माणविषये उत्थापितानां प्रश्नानां कठोरं प्रत्युत्तरं ददत् ठाकुरः अवदत् यत् २९ वर्षेभ्यः विधायकत्वेन अहं एतान् दुर्गममार्गान् पादाभ्यां मापितवान् अस्मि, जनतायाः दुःख-कष्टानि च समीपेन अनुभूतवान् अस्मि। सः स्पष्टीकृतवान् यत् मुख्यमन्त्रीभवनात् पूर्वमेव तस्य विधानसभायाः सर्वे पञ्चायताः मार्गैः सह सम्बद्धाः आसन्, तस्य कार्यकाले च विना किमपि भेदभावं सम्पूर्णहिमाचलस्य एकसमानः विकासः सुनिश्चितः कृतः।

# राज्यस्तरे ज्वाल्पाधाम्नः उज्ज्वला कीर्तिः



**हिमसंस्कृतवार्ताः- डॉ नवीन ममगाईं पौडी गढवाल,** उत्तराखण्ड- संस्कृत- शिक्षा- परिषदः आयोजिता संस्कृत-बोर्ड- परीक्षायां 2026 तमे परिणामः शुक्रवासरे घोषितः। परिणाम-प्रकाशनसमये सर्वत्र हर्षोल्लासस्य वातावरणं दृष्टं।पौड़ी-जनपदस्य ज्वाल्पाधाम्नः स्थितः श्री ज्वाल्पाधाम संस्कृत उत्तरमध्यमा विद्यालयः "ज्वाल्पादेवी" इत्यस्य छात्रः साहिल चमोला पूर्वमध्यमा- द्वितीयवर्षे राज्यस्तरे सप्तमं स्थानम् प्राप्तवान्। अस्य उत्कृष्ट-प्रदर्शनेन विद्यालयेन सह सम्पूर्ण-क्षेत्रस्य नाम गौरवान्वितः जातः।विद्यालयस्य परिणामः अपि अत्यन्तं प्रशंसनीयः अभवत्। पूर्वमध्यमा परीक्षायां दश छात्रेषु अष्ट प्रथम-श्रेण्याम्, द्वौ द्वितीययौ-श्रेण्यौः उत्तीर्णौ। उत्तरमध्यमा परीक्षायां सप्त छात्रेषु त्रयः प्रथमाः- श्रेणिषुः चत्वारः द्वितीयाः-श्रेणेषु च सफलतां प्राप्तवन्तः।

समग्रः परीक्षा-परिणामः शत-प्रतिशतः आसीत, । अस्मिन् अवसरे विद्यालय-प्रबन्धकः श्री शशि मोहन उनियालः तथा प्रधानाचार्यः श्री दिनेश लालः सर्वेषां छात्राणाम्, अभिभावकानां, अध्यापकानां च अभिनन्दनं कृतवन्तौ, मातुः ज्वाल्पायाः छात्राणाम् उज्ज्वल-भविष्यस्य शुभकामनाः कृतवन्तौ शुभाषयाश्च व्यक्तवन्तौ।

# विनोदकणिका

यदि पृथिव्यां भवतः भारः १०० किलोग्रामः भवति तर्हि मङ्गलग्रहे ३८ किलोग्रामः भवति तथा च चन्द्रमसि १६.६ किलोग्रामः भवति। त्वं स्थूलः नासि तर्हि भोजने किमपि परिवर्तनं नावश्यकम्। किन्तु ग्रहाः परिवर्तनं कुर्वन्तु। जनहिताय ISRO द्वारा प्रचालितम्।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

# पुरीस्थे श्रीजगन्नाथसंस्कृतविश्वविद्यालये वाग्वर्धिनीसभायाः दशमं सत्रं समाचरितम्




**हिमसंस्कृतवार्ताः**-11/4/26 तमे दिनाङ्के शनिवासरे पुरीस्थे श्रीजगन्नाथसंस्कृतविश्वविद्यालये वाग्वर्धिनीसभायाः दशमं सत्रं समाचरितम्। सत्रस्यारम्भे लौकिकं मङ्गलं समाचरत् व्याकरणविभागस्य आचार्यप्रथमवर्षस्य छात्रा सन्ध्या। सत्रेऽस्मिन् छात्राणां मार्गदर्शनाय समुपस्थिताः। आसन्- व्याकरणविभागाध्यक्षः डॉ. पूर्णचन्द्रपढिमहोदयः अथ च नयायविभागस्य शिक्षिका डॉ. रश्मिता जेना महाशया। अत्र सत्रे अष्टौ छात्राः स्वीयम् अभीप्सितं विषयम् उपास्थापयन्। व्याकरणविभागस्य आचार्यद्वितीयवर्षस्य छात्रा निवेदिता महापात्रः (कर्मणः भेदः) अथ च विष्णुप्रिया स्वागतिका (जगन्नाथसमर्चनम्), प्रथमवर्षस्य पूजारानी महान्तः (पाणिनेः परिचयः),जयदेवः पण्डा(सूत्रलक्षणम्), दीतेन्दुः पाणिः (उभयगतिरिह भवति), सन्तोषी शेट्टी (व्याकरणाध्ययनस्य प्रयोजनानि), न्यायविभागस्य प्रथमवर्षस्य शुभस्वागतिका पुहानः (तर्कविचारः), सुचिस्मिता साहू (षड्विधसन्निकर्षः) इति। इयं वाग्वर्धिनी सभा प्रतिसप्ताहं शनिवासरे समाचर्यते। अत्रावसरे विभिन्नेभ्यः विभागेभ्यः सप्तचत्वारिंशता छात्रैः सहभागः कृतः। सत्रेऽस्मिन् गीतस्य अनुगायनद्वारा सभां मोदितवत्यौ सृजनिका शुभश्री च। धन्यवादज्ञापनं कृतवती व्याकरणविभागस्य आचार्यप्रथमवर्षस्य छात्रा रानी नायकः। सत्रस्य निर्वहणं कृतवती व्याकरणविभागस्य आचार्यप्रथमवर्षस्य छात्रा पूजारणी साहू। सत्रसंयोजनं कृतवती परिषत्संयोजिका व्याकरणविभागस्य सहायकाचार्या डॉ. प्रज्ञा। सर्वेषां सहयोगेन कार्यक्रमः सुसम्पन्नः। कल्याणमन्त्रेण सभेयं समलङ्कृता।

# परम्परा-संस्कारयोः संगमः विद्याधर-गुरुकुले नूतनप्रवेशोत्सवः



**हिमसंस्कृतवार्ताः- डॉ. नवीन ममगाई, पौडी गढवालः,** भुवनेश्वरीस्थिते ब्रिगेडियर विद्याधर जुयाल संस्कृत विद्यालये नवप्रवेशिछात्राणां कृते 'प्रवेशोत्सवः' महता उत्साहेन पारम्परिकमर्यादया च आयोजितः। विद्यालयपरिसरे नवागन्तुकविद्यार्थिनां स्वागतं ढोल- दमाऊ, शङ्ख-घण्टानां पवित्रध्वनिभिः तथा वैदिकमन्त्रोच्चारैः सह तिलक-माल्यार्पणेन कृतम्। विद्यालयस्य समृद्धपरम्परानुसारं सर्वेषां नवीनछात्राणां सामूहिकं भव्यं च अभिनन्दनं जातम्, येन सम्पूर्णं वातावरणं आध्यात्मिकशक्त्या उत्सवभावनया च ओतप्रोतं सञ्जातम्।
विद्यालयस्य प्रबन्धकः राजेन्द्रप्रसाद जुयालः नवप्रवेशिछात्राणां उज्ज्वलविष्याय शुभकामनाः प्रदत्तवान्। प्रधानाचार्यः अनुसूयाप्रसाद सुन्दरियालः छात्रान् प्रेरयन् अवदत् यत् अस्मिन् प्रतिष्ठितगुरुकुले अध्ययनस्य अवसरः सौभाग्यस्य विषयः अस्ति, अतः छात्राः पूर्णनिष्ठया, अनुशासनेन, समर्पणेन च स्वलक्ष्यं प्रति अग्रसराः भवन्तु।छात्रावास-अधीक्षकः नवीनजुयालः असूचयत् यत् प्रतिवर्षं दिल्ली- देहरादून- कोटद्वारादिभ्यः विभिन्नक्षेत्रेभ्यः छात्राः अत्र प्रवेशार्थं महत्या संख्यया आवेदनं कुर्वन्ति। अस्य मुख्यकारणं विद्यालयस्य अनुशासिता दिनचर्या, समर्पितशिक्षणव्यवस्था, उत्कृष्टं परीक्षाफलं च अस्ति। सः अवदत् यत् वयं विगत ३०-३५ वर्षेभ्यः निरन्तरं छात्रावासे उषित्वा छात्राणां भविष्यं परिष्कर्तुं प्रयत्नरताः स्मः, यस्य परिणामः अद्य समाजे प्रत्यक्षं दृश्यते।अध्यापकौ डा. नवीन ममगाईं तथा डा. अनूप कुकरेती च सूचनां दत्तवन्तौ यत् अस्मिन् वर्षे पञ्चाशत तः अधिकाः छात्राः प्रवेशार्थं आवेदनं कृतवन्तः, किन्तु आवासव्यवस्थायाः कारणात् केवलं एकत्रिंशत् ३१ छात्राः एव प्रवेशं प्राप्तुं शक्तवन्तः। अध्यापकवृन्दे कमलदीप पोखरियालः, ईशान डोभालः, आशीष डबरालः, नीरज पटवालः, अङ्कित मैठानी च विद्यार्थिनां स्वागतं कृतवन्तः, तान् नियमितदिनचर्यायाः पालनाय श्रेष्ठोपलब्धिभ्यः च प्रोत्साहितवन्तः।अस्मिन् अवसरे उपस्थिताः अभिभावकाः विद्यालयं प्रति कृतज्ञतां ज्ञापितवन्तः। विद्यालयप्रशासनेन अभिभावकाः आश्वस्ताः कृताः यत् तेषां पाल्यानां भविष्यं सुरक्षितं समुज्ज्वलं च विधातुं सम्पूर्णं विद्यालयपरिवारं पूर्णसमर्पणेन कार्यं करिष्यति। इत्थं परम्परा-अनुशासन-संस्कारैः युक्तः अयं प्रवेशोत्सवः नूतनविद्यार्थिनां भविष्यस्य एकः नवीनं पन्थाः सञ्जाता।

## हिमसंस्कृतवार्ताः, ईदधीरजः,हैदराबादः
## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। मया एका नूतना वार्ता श्रुता। अमेरिकादेशस्य पूर्व-राष्ट्राध्यक्षेण महान् क्रोधः प्रकटीकृतः।
**नन्दिनी-** किमर्थं सः कुपितः?
**काव्या-** यतः एकस्याः प्रसिद्ध-गायिकायाः विवाह- महोत्सवः निश्चितः। तेन महोत्सवेन राष्ट्रपतेः राजनैतिक-कार्यक्रमस्य प्रचारः नाशितः।
**नन्दिनी-** अहो, जनानां ध्यानम् अन्यत्र नीतम्। एतत् तु हास्यकरम्। विख्यातानां जीवनं सर्वदा विस्मयकरम्।
**नन्दिनी-** इदानीम् आङ्ग्लदेशस्य राजधान्याः एका अपरा वार्ता पठिता।
**काव्या-** का सा वार्ता?
**नन्दिनी-** एकेन चोरेण विंशति-कोटि-रूप्यकाणां मूल्यस्य एकं कलात्मकं सुवर्णाण्डं चोरितम्।
नन्दिनी- किन्तु तत् बहुमूल्यम् अण्डं तेन चोरेण अल्प-मूल्येन मादक-द्रव्याणां कृते विक्रीतम्।
**काव्या-** महदाश्चर्यम्! चोराणां मतिः भ्रष्टा एव।
**काव्या-** किन्तु अन्यया एकया उत्तम-छात्रया स्वस्य ऋणं वेगेन समाप्तं कृतम्।

# ४७तमः वार्षिकोत्सवो भव्यतया सम्पन्नः, (३८४ छात्र-छात्राः पुरस्कृताः)



**हिमसंस्कृतवार्ताः- डॉ. चन्द्रकान्तदत्तशुक्लः, मऊ उत्तरप्रदेशः।** सन्तगणिनाथ- राजकीय- स्नातकोत्तर- महाविद्यालयस्य सप्तचत्वारिंशत्तमः वार्षिकोत्सवः कुशलतया सम्पन्नः। विशिष्टातिथिः इन्दू देवी 'डायमण्ड' माननीया अध्यक्षा नगरपञ्चायत- मुहम्मदाबादस्य समारोहाध्यक्षः महाविद्यालयस्य प्राचार्यः डॉ. प्रहलादराम महोदयः अन्ये च सम्मान्याः सम्मिल्य दीपं प्रज्वाल्य, मातरं सरस्वतीं प्रपूज्य समारोहस्य शुभारम्भं कृतवन्तः। तत्रादौ संस्कृतविभागीयैः छात्रैः सरस्वतीवन्दना स्वागतगीतादिकं प्रस्तुतम्। महाविद्यालयस्य प्राध्यापकैः माल्यार्पणेन, उत्तरीय- स्मृतिचिह्नादि- स्वागतवस्तूनि प्रदाय अतिथीनां स्वागतं विहितम्। वचोभिः स्वागतभाषणं कृतं कुलानुशासकैः डॉ. राकेशकुमारवर्यैः। वार्षिकाख्या हिन्दीविभागाचार्यैः डॉ. अवनीशपाण्डेयवर्यैः प्रस्तुता।
अवसरेऽस्मिन् महाविद्यालयस्य छात्र-छात्राः अनेकान् सांस्कृतिककार्यक्रमान् प्रस्तुतवन्तः। 'आयो रे, शुभ दिन आयो' सोनाली विश्वकर्मा, शम्भो, शिवशम्भूस्वयम्भू गीतोपरि वंशिकारायः, महिषासुरमर्दिनीस्त्रोत्रमुपरि रञ्जू-खुशबू प्रजापती योगप्रदर्शनृत्यं,'श्यामा आन बसो वृन्दावन में' रुचि यादवः, 'बैखौफ आजाद रहना है मुझे' प्रशंसा सिंहः, 'जो है अलबेला मदनैनों वाला' सोनाली, 'पिंगा ग पोरी, साक्षी पाण्डेया, 'घर मोरे परदेशिया' आफरीन खां, 'तू मेरी खामोशी' अमनकुमारः मधुवन में कन्हैया' रितिका चौहानादयः छात्राः अत्यन्तं मनोहरं नृत्यं कुशलतापूर्वकं प्रस्तुतवत्यः। 'ऊंचा हिमालय ऊँचा तिरङ्गा' अवनीशसरोजः, 'लहरा के झूमे तिरंगा, तारों को चूमे तिरंगा' आस्था वर्मा, 'क्या मनमौजी' रिया गुप्ता प्रभृतिच्छात्राः सुमधुरगीतं प्रस्तुतवत्यः। अभय-चन्द्रकेशप्रभृतयः वर्तमानराजनीतिमादाय सन्देशप्रदायकं नाटकं प्रस्तुतवन्तः। मध्ये-मध्ये अतिथयः मिशनशक्ति, अटलजयन्ती, परिषदीय, विभागीयपुरस्कारान्नपि छात्रेभ्यः प्रमाणपत्रसहितान् प्रदत्तवन्तः।
विशिष्टातिथिः इन्दुदेवीमहोदया छात्राणां प्रस्तुतिमवलोक्य मोदमाना हृदा प्रशंसितवती। तया प्रोक्तं यत् जीवने साफल्याय स्पर्धा आवश्यकी अतः यदा कदापि स्वकीयां प्रतिभां प्रदर्शयितुम् अवसरो मिलेत् सोत्साहं प्रतिभागिता विधेया। अन्ते सा महाविद्यालयपरिवाराय छात्रछात्राभ्यश्च शुभकामनाः प्रदत्तवती। अध्यक्षीयाशीर्वचने प्राचार्यः डॉ. प्रहलादरामवर्यः सम्बोधितवान् यत् मम महाविद्यालयस्य छात्राणां सांस्कृतिकप्रस्तुतिः नितरां मनोहारिणी आसीत्। एतादृशं प्रदर्शनं न केवलं मनोरञ्जनकरम् अपि तु जीवने स्वास्थ्यप्रदम् अनुशासनप्रदं च भवति। प्राचार्यवर्यः आसन्नवार्षिकपरीक्षामवलोक्य अचिरम् अवशिष्टं पाठ्यक्रमं प्रपूर्य सम्यक्तया सज्जीभूय च परीक्षायां सम्मिलिता भवन्त्विति उक्तवान्। अस्मिन् क्रमे महाविद्यालयतः सेवानिवृत्तिं प्राप्तवतोः प्रमोदचौबे, शोभासिंहेत्यनयोः सौप्रस्थानिकं विहितम्। अन्ते संस्कृतविभागीयपरास्नातक छात्राभिः आंचलगुप्ता महकमौर्या आकांक्षा चौहान सुस्मिता रेणू यादव साधना चौहान स्नेहा मनीषा मधुरिमा चौहान तैत्तिरीयोपनिपनिषदः दीक्षान्तोपदेशः प्रस्तुतः। समेभ्यः धन्यवादज्ञापनं डॉ. बालमुकुन्दयादववर्यैः प्रदत्तम्। वार्षिकोत्सवस्य सञ्चालनं समारोह केन डॉ. चन्द्रकान्तदत्तशुक्लवर्येण विहितम्। विशेषेण सहयोगिनः प्राध्यापकाः डॉ. अजयवर्मा, डॉ. विजयबहादुरयादवः, डॉ. दिवाकरयादवः, डॉ. अविनाशचन्द्रयादवः, डॉ. अमृता तिवारी, डॉ. दिनेशयादवः, डॉ. राजेशयादवः, डॉ. अभिनयगिरिः, डॉ. शादाब अहमदः, डॉ. कृष्णदेवोपाध्यायः, डॉ. मनोजवर्मा, डॉ. बृजरानी तिवारी, डॉ. आशुतोषत्रिपाठी, डॉ. सरिता दुबे, डॉ. प्रभा भारतीय, डॉ. शिवप्रतापरायः, डॉ. राजकमलयादवः, डॉ. दुर्गाप्रसादसिंहः, डॉ. शैलेन्द्रकुमारः, डॉ. सन्दीपगौरवः, डॉ. सतीशकुमारः, डॉ. अमितपटेलः प्रभृतयः आचार्याः, कार्यालयप्रमुखा चन्द्रप्रकाशवर्मा, रामकेशयादवप्रभृतयः कर्मचारिणः, सभ्याः नागरिकाः अभिभावकाः, सप्तशताधिकाः छात्र-छात्राश्चोपस्थिता आसन्।